श्रीराधा सर्वेश्वरो जयति

॥श्रीमते निम्बार्क महामुनीन्द्राय नमः ॥

निम्बार्क वैष्णव-सन्ध्या

सम्पादक

कृष्णशरण पोखरेल 'शास्त्री'

प्रकाशक

श्रीहरिव्यास निकुज मन्दिर, वृन्दावन

उ.प्र. भारत

श्रीराधा सर्वेश्वरो जयति ॥श्रीमते निम्बार्क महामुनीन्द्राय नमः॥

अथ संक्षिप्त निम्बार्क वैष्णव–सन्ध्या

प्रातः काल स्नान गरेर शुद्ध भई, शुद्ध वस्त्र धारण गरेर, सन्ध्या गर्नको लागि शुद्ध भूमिमा आसन ओच्छ्याएर "**ॐ आधारशक्ति कमलासनाय नमः**" यस मन्त्रलाई पढेर धेनु–मुद्रा देखाउँदै आसनमा बस्ने। तत्पश्चात् देब्रे हातमा जल लिएर दाहिने हातको औंलाहरूले आसनमा जल छर्कंदै निम्न लिखित मन्त्रले आसन शुद्धि गर्ने।

ॐ पृथ्वी त्वया धृता लोकाद्देवि त्वं विष्णुना धृता।
त्वं च धारय मां देवि पवित्रं कुरु चासनम्।।

यसै प्रकार निम्नाङ्कित मन्त्र भनेर शरीरको शीर आदि समस्त अङ्गहरू माथि जल छर्किंदै शरीरको शुद्धि गर्ने–

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
यः स्मरेत्पुण्डरीकाक्षं स वाह्याभ्यन्तर शुचिः॥

फेरि मूल मन्त्र (गुरु प्रदत्त मन्त्र)ले शिखा बन्धन गर्ने, पुनः देब्रे हातमा जल लिएर दाहिने हातले गोपिचन्दन घिस्ने र त्यसैमा षट्कोणको आकृति बनाएर '**क्लीं**' यो

काम बीज लेख्ने र फेरि त्यसलाई दाहिने हातको हत्केलाले ढाकेर १० पटक गुरुप्रदत्त मूल–मन्त्रले अभिमन्त्रित गरेर ब्राह्मण भए द्वादश क्षत्रिय भए ४ वैश्य भए २ र शुद्र भए केवल निधारमा मात्र उर्ध्वपुण्ड्र तिलक लगाउने। उर्ध्वपुण्ड्र तिलक नासिकाको तीन भाग मध्ये एकभाग भन्दा माथि लगाउनु पर्दछ। नारीले द्वादश तिलक लगाउने विधान छैन केवल निधारमा मात्र तिलक लगाउनु।

१. **ॐ केशवाय नमः** (निधारमा)

२. **ॐ नारायणाय नमः** (पेटमा)

३. **ॐ माधवाय नमः** (छातिमा)

४. **ॐ गोविन्दाय नमः** (कण्ठमा)

५. **ॐ विष्णवे नमः** (दाहिने कोखमा)

६. **ॐ मधूसूदनाय नमः** (दाहिने पाखुरामा)

७. **ॐ त्रिविक्रमाय नमः** (दाहिने काँधमा)

८. **ॐ वामनाय नमः** (देब्रे कोखमा)

९. **ॐ श्रीधराय नमः** (देब्रेपाखुरामा)

१०. **ॐ हृषिकेशाय नमः** (देब्रे काँधमा)

११. **ॐ पद्मनाभाय नमः** (पीठमा)

१२. दामोदराय नमः (कटि भागमा) ॥

हत्केलामा बाँकी बसेको अवशिष्ट चन्दनलाई जलले भिजाएर **'वासुदेवाय नमः'** यो मन्त्र पढेर शिखामा पुछिदिने। यस पछि दाहिने हातमा अथवा आचमनीमा जल लिएर निम्नलिखित सङ्कल्प पढ्ने–

हरिः ॐ तत्सत्–३ विष्णु–३ ॐ तत्सदद्यैतस्य विष्णोराज्ञया प्रवर्तमानस्य ब्रह्मणोऽह्नि द्वितीयपरार्द्धे श्री श्वेतवाराहकल्पे भूर्लोके जम्बूद्वीपे भरतखण्डे आर्यावर्तान्तर्गत–ब्रह्मावर्तैक देशे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलि प्रथम चरणे श्रीमन्नृपति–विक्रमस्य अमुक नाम सम्वत्सरे, अमुकायने, अमुक ऋतौ, अमुकमासे, अमुक पक्षे, अमुक तिथौ, अमुक वासरे, अमुकनामा, अमुक गोत्रोत्पन्नोऽहं कायिक, वाचिक, मानसिक, सांसर्गिक पाप दुरितोप शमनार्थं प्रातः सन्ध्योपासनं करिष्ये।

आचमनः–दाहिने हातको हत्केलामा अलि–अलि जल लिएर निम्न लिखित मन्त्रहरूद्वारा तीन आचमन गर्ने।

१.ॐ केशवाय नमः २. ॐ नारायणाय नमः

३. ॐ गोविन्दाय नमः।

प्रणायामः– प्राणायामको तीन भेद छन्ः– पूरक, कुम्भक र रेचक ।

१.पूरक– दाहिने हातको अंगुष्ठ (बुढी औंलो) ले नासिका को दाहिने छिद्रलाई बन्द गरेर देब्रे छिद्र बाट श्वास (सास)द्वारा वायुलाई बिस्तारै–बिस्तारै चढाउँदै (भित्र लैजादै) '**क्लीं**' यस बीज मन्त्रलाई १६ पटक मनमनै उच्चारण गर्नै।

२.कुम्भक– दाहिने छिद्रलाई बन्द गरेको गर्‍यै देब्रेलाई पनि मध्यमा र अनामिकाको सहायताले बन्द गर्ने र श्वासलाई रोकेर राख्ने। र मनमनै '**क्लीं**' यो बीज मन्त्रलाई ६४ पटक उच्चारण गर्ने।

३. रेचक– नासिकाको दाहिने छिद्रबाट अंगुष्ठलाई हटाएर श्वासलाई विस्तारै छोड्नेर त्यसै '**क्लीं**' मन्त्रको ३२ पटक मनमनै उच्चारण गर्ने। उपरोक्त पूरक, कुम्भक र रेचकलाई पहिले देब्रे नासिकाको स्वर बाट गर्नुपर्छ र फेरि दाहिने स्वरको छिद्र बाट गर्ने।

अघमर्षण–दाहिने हातमा जल लिएर त्यसलाई देब्रे हातले

ढाकेर तीन पटक मूल मन्त्र (गुरू प्रदत्त)ले अभिमन्त्रित गरि नासिकाको दाहिने छिद्रमा लगाई मनमा यो भावना गर्नु कि– मेरो मनको भित्र जतिपनि पाप थिए, ती सबै जलमा आईसकेका छन्, फेरि '**अस्त्राय फट्**' यो मन्त्र भनेर जललाई आफ्नो देब्रे तिर जमीनमा झट्कारेर फ्याँकिदिनु र यो कल्पना गर्नु कि वज्रशिला माथि पछ्छारेर मैंले यी पापहरूलाई ध्वंस गरिदिए।

मार्जन–देब्रे हातमा जल लिएर दाहिने हातको औंलाहरू द्वारा निम्न लिखित वाक्यहरूले शरीरको अङ्गहरूमा
प्रोक्षण गर्नु अर्थात जलले छिंटा दिने।

ॐ दामोदराय नमः – शिरसि। ॐ सङ्कर्षणाय नमः– मुखे। ॐ वासुदेवाय नमः– ललाटे। ॐ प्रद्युम्नाय नमः घ्राणयोः। ॐ अनिरुद्धाय नमः– मुखे। ॐ पुरुषोत्तमाय नमः– नेत्रयोः। ॐ अधोक्षजाय नमः– कपोलयो।ॐ नृसिंहाय नमः– श्रोत्रयोः। ॐ अच्युताय नमः नाभौ। ॐ जनार्दनाय नमःहृदये।ॐ हरये नमः पादयोः। ॐ विष्णवे नमः हस्तयोः। ॐ उपेन्द्राय नमः – सर्वाङ्गे।

भूत शुद्धि– दाहिने हातमा अथवा आचमनिमा जल लिएर

– **'ॐ अद्य श्रीमत्सर्वेश्वरराधाकृष्णाराधन योग्यतासिध्यर्थं भूतशुद्धिमहं करिष्ये'** यस वाक्य द्वारा भूत शुद्धिको सङ्कल्प गरेर जल छोडिदिनु पर्छ।

फेरि कच्छप मुद्राद्वारा हृदयस्थित दीपक कर्णिकाको आकार भएको जीवरूपी ज्योतिलाई परम तेजमा, अर्थात् वृन्दावनस्थ सहस्त्रदल कमलमा स्थित श्रीराधाकृष्णमा समाहित गरेर पृथ्वी आदि २५ तत्त्वहरूलाई पनि त्यसैमा लीन मानेर **'यं'** यस वायु बीजलाई मनमनै १६ पटक जप्दै नासिकाको देब्रे छिद्रबाट स्वासलाई भित्र चढाउने(तान्ने)। फेरि त्यसै **'यं'** बीजको ६४ पटक जप्दै नासिकाको दुबै छिद्रलाई बन्द गरेर स्वासलाई भित्रै रोकेर राख्ने। त्यस समय मनमा यो भावना गर्नु कि अब यो मेरो प्राकृत शरीर वायुको द्वारा शोषण गरियो। फेरि त्यसै वायु बीज **'यं'** लाई मनमनै ३२ पटक उच्चारण गरेर बिस्तारै–बिस्तारै दाहिने छिद्रबाट श्वासलाई छोड्ने।

फेरि यस देहमा स्थित दूषित भावनालाई नष्टगर्ने रक्तवर्ण अग्नि बीज **'रं'** यस बीज मन्त्रलाई मनमनै १६ पटक जप्दै नासिकाको दाहिने छिद्रबाट स्वासलाई भित्र चढाउने (तान्ने)।

फेरि त्यसै '**रं**' बीजलाई ६४ पटक जप्दै नासिका को दुबै छिद्रलाई बन्द गरेर स्वासलाई भित्रै रोकेर राख्ने यानि कुम्भक गर्नु र देहमा स्थित दूषित वृत्तिहरू नष्ट भएको भावना गर्ने। तदनन्तर त्यसै अग्नि बीज '**रं**' लाई मनमनै ३२ पटक उच्चारण गरेर बिस्तारै–बिस्तारै देब्रे छिद्रबाट श्वासलाई छोड्ने। यस पछि श्वेतवर्ण भएको चन्द्र बीज '**ढं**' यस चन्द्र बीजलाई मनमनै १६ पटक जप्दै नासिकाको दाहिने स्वरलाई बन्द गरेर बायाँ स्वरबाट बिस्तारै–बिस्तारै स्वासलाई चढाउनु र त्यस बीजको देवता ललाट देशीय चन्द्रमामा लीन भएको भावना गर्नु। फेरि शुक्ल वर्णवाला वरुण बीज '**वं**' को मनमनै ६४ पटक जप गर्दै कुम्भक गर्नु, त्यस समय अमृतमयी वृष्टिको भावना गर्दै यो कल्पना गर्नु कि अब यो मेरो शरीर भगवान्‌को सेवाको योग्य संशुद्ध भयो। त्यस पछि पहेंलो वर्ण भएको पृथ्वी बीज '**लं**' यस मन्त्रलाई ३२ पटक मनमनै जप गर्दै नासिकाको दाहिने स्वरलाई खोलेर (दाहिने छिद्रबाट) बिस्तारै–बिस्तारै स्वासलाई छोड्नु र निम्न लिखित श्रीगोपाल–गायत्री द्वारा करन्यास, अङ्गन्यास आदि गर्नु।

करन्यास– ॐ गोपालाय–अंगुष्ठाभ्यां नमः। विद्महे–तर्जनीभ्यां नमः। गोपीजन वल्लभाय– मध्यमाभ्यां नमः। धीमहि अनामिकाभ्यां नमः। तन्नः कृष्णः कनिष्ठिकाभ्यां नमः। प्रचोदयात्– करतलकर पृष्ठाभ्यां नमः।

अङ्गन्यास– ॐ गोपालाय– हृदयाय नमः। विद्महे– शिरसे स्वाहा। गोपीजनवल्लभाय– शिखायैवषट्। धीमहि– कवचाय हुम्। तन्नः कृष्णः– नेत्रत्रयाय वौषट्। प्रचोदयात्– अस्त्राय फट्।

गायत्री आवाहन– दुबै हातले अञ्जली जोडेर बड़ो नम्रभावले आवाहन मन्त्रद्वारा गायत्रीको आवाहन गर्नु अर्थात् बोलाउनु। मानसिक भावनाद्वारा एउटा सुन्दर आसनको कल्पना गर्दै त्यसमा बसाल्नु। गायत्री आवाहन मन्त्र–

आगच्छ वरदे देवि त्रिपदे कृष्णवादिनि।
गायत्रिछन्दसां मातः कृष्णयोनि नमोऽस्तु ते॥

तदनन्तर श्रीगोपाल गायत्रीको कम्तीमा दस पल्ट जप गर्नु। जप गरिसकेपछि निम्नलिखित मन्त्रले गायत्रीको विसर्जन गर्नु अर्थात् जसरी बोलाईएको थियो त्यसै गरी जानको लागि पनि बड़ो नम्रभावले प्रार्थना गर्नु।

उत्तमे शिखरे जाता भूम्यां पर्वतमूर्धनि।
ब्राह्मणेभ्योऽभ्यनुज्ञाता गच्छ देवि यथासुखम्॥

यस पछि सूर्यार्घ्य प्रदान गर्ने– हातमा पुष्प लिएर सूर्य–मण्डलमा सिंहासनस्थ सर्वेश्वर श्रीराधाकृष्णको निम्नलिखित श्लोकद्वारा ध्यान गर्नु।

ध्येयं सदा सवितृमण्डलमध्यवर्ती,
सर्वेश्वरः सरसिजा सनसन्निविष्टः।
केयूरवान् मकरकुण्डलवान्किरीटी–
हारी–हिरण्मयवपुर्धृतशंखचक्रः॥

यस पछि अनन्तर चाँदी, तामा आदि को स्वच्छ अर्घ्य–पात्रलाई चन्दन पुष्पादि युक्त जलले पूरित गरेर मूल (श्रीगुरुप्रदत्त) मन्त्रको उच्चारण गर्दै '**सूर्यमण्डलस्थाय सर्वेश्वर श्रीराधाकृष्णाभ्यां इदमर्घ्यं समर्पयामि**' यो भनेर श्रीसूर्यदेवलाई तीन पल्ट अर्घ्य अर्पण गर्नु।

क्षमा प्रार्थना–

मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर।
यत्पूजितं मया देव परिपूर्ण तदस्तु मे॥

★★★

श्रीमुकुन्द (शरणागति) मन्त्र–जप–विधिः

विनियोगः– हातमा जल लिएर **ॐ अस्य श्रीमुकुन्द–शरणमन्त्रस्य श्रीनारद ऋषिः, गायत्रि छन्दः, श्रीमुकुन्द परमात्मा देवता, श्रीं बीजम्, रमादेवी शक्तिः, प्रपदनं कीलकम्, श्रीभगवदनुशासन–पालने विनियोगः।**

ऋष्यादि न्यास– श्रीनारदऋषये नमः शिरसि। अनुष्टुप् छन्दसे नमः मुखे। श्रीमुकुन्दपरमात्मा देवतायै नमः हृदि। श्रीं बीजाय नमः गुह्ये।। रमादेवीशक्तये नमः पादयो। प्रपदनं कीलकाय नमः सर्वाङ्गे।

करन्यास– श्रीमन् अंगुष्ठाभ्यां नमः। मुकुन्दचरणौ तर्जनीभ्यां नमः। सदा मध्यमाभ्यां नमः। शरणं अनामिकाभ्यां नमः। अहं कनिष्ठिकाभ्यां नमः। प्रपद्ये करतलकरपृष्ठाभ्यां नमः।

अङ्गन्यास– श्रीमन् हृदयाय नमः। मुकुन्दचरणौ शिरसे स्वाहा। सदा शिखायैवषट्। शरणं कवचाय हुम्। अहं नेत्राभ्यां वौषट्। प्रपद्ये अस्त्राय फट्।

अवरोह–आरोह क्रमले पदन्यास– श्रीमन्मुकुन्दचरणौ नमो मस्तके। सदा नमो वक्त्रे। शरणं नमा हृदि। अहं नमो नाभौ। प्रपद्ये नमो गुह्ये।

वर्णन्यास– श्रीं मस्तके। मं ललाटे। मुं भ्रू मध्ये। कुं दक्षिणकर्णे। दं वामकर्णे। चं दक्षिणनेत्रे। रं वामनेत्रे। णौं दक्षिणनासायाम्। सं वामनासायाम्। दां मुखे। शं कण्ठे। रं हृदि। णं नाभौ। मं दक्षिण कुक्षौ। हं वाम कुक्षौ। प्रं गुह्ये। पं जान्वोः। द्यें पादयोः।

ध्यान–

श्यामावदातं करुणार्द्रनेत्रं प्रसन्नवक्त्रं स्वजनैकजीवनम्।
श्रीवत्सचिह्नं गलकौस्तुभं भजे श्रीमुकुन्दं प्रणतार्तिनाशकम्॥

यस प्रकार ध्यान गरेर धेनुमुद्रा देखाउदै यथा शक्ति जप गर्ने।

★★★

गोपाल–मन्त्र जप विधि

विनियोग– ॐ अस्य श्रीगोपालाष्टादशाक्षरमन्त्रस्य, श्रीनारद ऋषिः, अनुष्टुप छन्दः, श्रीकृष्णपरमात्मा देवता, क्लीं बीजम्, स्वाहा शक्तिः, ह्रीं कीलकम्, श्रीकृष्णप्रीत्यर्थे जपे विनियोगः।

ऋष्यादि न्यास– श्रीनारदऋषये नमः शिरसि। गायत्री छन्दसे नमः मुखे। श्रीकृष्णपरमात्मा देवतायै नमः हृदि। क्लीं बीजाय नमः गुह्ये। स्वाहा शक्तये नमः पादयो। क्लीं कीलकाय नमः सर्वाङ्गे।

करन्यास– ॐ क्लीं अंगुष्ठाभ्यां नमः। कृष्णाय तर्जनीभ्यां नमः। गोविन्दाय मध्यमाभ्यां नमः। गोपिजन अनामिका–भ्यां नमः। वल्लभाय कनिष्ठिकाभ्यां नमः। स्वाहा करतलकरपृष्ठाभ्यां नमः।

अङ्गन्यास– ॐ क्लीं हृदयाय नमः। कृष्णाय शिरसे स्वाहा। गोविन्दाय शिखायै वषट्। गोपिजन कवचाय हुम्। वल्लभाय नेत्राभ्यां वौषट्। स्वाहा अस्त्राय फट्।

पदन्यास– क्लीं नमो मूर्ध्नि। कृष्णाय नमो वक्त्रे। गोविन्दाय नमो हृदि। गोपिजनवल्लभाय नमो नाभौ। स्वाहा नमः पादयोः।

वर्णन्यास– ॐ क्लीं शिरसि। कृं ललाटे। ष्णां भ्रुवोः। यं नेत्रयोः। गों कर्णयोः। विन् घ्राणयोः। दां मुखे। यं कण्ठे। गों स्कन्धयोः। पीं हृदि। जं उदरे। नं नाभौ। वं गुह्ये। ल्लं आधारे। भां कट्यां। यं उर्वोः। स्वां जान्वोः। हां पादयोः।

यस प्रकार उपर्युक्त पाँचै प्रकारका न्यास गरेर पद्मासनमा बसेर मेरुदण्डलाई सीधा राख्दै दृष्टिलाई नासिकाको अग्रभागमा स्थिर गरेर तुलसीको मालाले हातलाई हृदय सँग जोडेर तथा मनमा युगलसरकार श्रीराधासर्वेश्वर प्रभुको

ध्यान गर्दै यथाशक्ति जप गर्नु।

जप पश्चात् निम्नलिखित मन्त्रद्वारा आफुले गरेको जपलाई भगवान् श्रीराधासर्वेश्वरलाई अर्पण गर्ने।

ॐ गुह्यातिगुह्य गोप्ता त्वं गृहाणास्मत्कृतं जपम्।
सिद्धिर्भवतु मे देव त्वत्प्रसादात्त्वयि स्थितिः॥

श्रीराधिकाष्टकम्

जयति कुञ्जविभूषणराधिका
प्रियतमस्य सदा सुख साधिका।
जयति साधकबाधकबाधिका
हृदयतां दयतां प्रणयाधिका॥
दयितकण्ठसमर्पितदोर्लता
स्मितमुखी किमपि प्रियवादिनी।
विहरतीह ममात्मसखी
शनैरुपवने पवनेन निशेविते॥
भुजद्युतिं भ्रुकुटीमनुहुंकृतिं
विमुखतामपि मानिनि माधवे।
विदधतीं भवतीं क्व समादधे
मुख विधोः ख विधो समाताकृतौ॥

अयि मृगाक्षि ममाक्षि पथे सदा
निवस मा त्यज मां वशमागतम् ।
इति वदन्तममुं परिरभ्यसा
मदयितं दयितं परिचुम्बति ॥
तव रहस्यमनोगतसेवया
प्रमुदितेन कदा वितरिष्यते ।
प्रियतमार्पितचर्वितवीटिका
क्व हरिणा हरिधाक्षि मदानने ॥
सकलसाधनहीनमथाप्यहो
सकलसद्गुणपण्डितमानिनन् ।
करुणयाऽह कारणशून्यया
तव वनेऽव वनेश्वरिमागतम् ॥
कथमलं मनुजोगुणवर्णने
निजजनाश्रयणीयगुणालये ।
तव विहारवनैकरजःकणः
सुमनसां मनसाञ्च न गोचरः ॥
सकृदपि प्रतिवासमष्टकम्
पठति यो हि पुरस्तव राधिके ।

सकृदपि प्रणयात्तव पादयो
रवनतो वनतो न भवेद्बहिः ॥

॥ इति राधिकाष्टकम् ॥

★★★

श्रीभगवान् शंकरकृत–

श्रीराधाकृपाकटाक्ष

मुनीन्द्रवृन्द वन्दिते त्रिलोक शोक हारिणी,
प्रसन्नवक्त्र पङ्कजे निकुञ्ज भू –विलासिनी ।
व्रजेन्द्र भानु नन्दिनी व्रजेन्द्र सूनु संगते,
कदाकरिष्यसीह मां कृपाकटाक्षभाजनम् ॥

अशोकवृक्षवल्लरी वितानमण्डपस्थिते,
प्रवालज्वालपल्लव प्रभारुणाङ्घ्रिकोमले ।
वराभयस्फुरत्करे प्रभूतसम्पदालये,
कदाकरिष्यसीह मां कृपाकटाक्षभाजनम् ॥

अनंग रंग मंगल प्रसंगभंगुरभ्रुवां,
सुविभ्रमं ससम्भ्रमं दृगन्तबाणपातनैः ।
निरन्तरं वशीकृत प्रतीतनन्दनन्दने,
कदाकरिष्यसीह मां कृपाकटाक्षभाजनम् ॥

तडित्सुवर्णचम्पक प्रदीप्तगौरविग्रहे,
मुखप्रभापरास्तकोटिशारदेन्दुमण्डले।
विचित्रचित्रसंचरच्चकोरशावलोचने,
कदाकरिष्यसीह मां कृपाकटाक्षभाजनम्॥
मदोन्मदातियौवने प्रमोदमानमण्डिते,
प्रियानुरागरञ्जिते कलाविलासपण्डिते।
अनन्य धन्य कुंजराज कामकेलिकोविदे,
कदाकरिष्यसीह मां कृपाकटाक्षभाजनम् ॥
अशेषहावभावधीरहीरहारभूषिते,
प्रभूतशातकुम्भकुम्भकुम्भिकुम्भसुस्तनि।
प्रशस्तमन्दहास्यचूर्णपूर्णसौख्यसागरे ,
कदा करिष्यसीह मां कृपाकटाक्षभाजनम्॥
मृणालवालवल्लरि तरंगरंगदोर्लते,
लताग्रलास्यलोलनील लोचनावलोकने ।
ललल्लु लन्मिलन्मनोज्ञ मुग्धमोहनाश्रये,
कदाकरिष्यसीह मां कृपाकटाक्षभाजनम्॥
सुवर्णमालिकांचिते त्रिरेखकम्बुकण्ठगे,
त्रिसूत्रमंगलीगुण त्रिरत्नदीप्तिदीधिते।

सलोलनीलकुन्तले प्रसूनगुच्छगुम्फिते,
कदाकरिष्यसीह मां कृपाकटाक्षभाजनम्॥
नितम्बबिम्ब लम्बमान–पुष्पमेखलागुणे,
प्रशस्तरत्नकिंकिणीकलापमध्यमंजुले।
करीन्द्रशुण्डदण्डिका–वरोहसौभगोरुके,
कदाकरिष्यसीह मां कृपाकटाक्षभाजनम्॥
अनेक मन्त्रनादमंजु नुपुरारवस्खलत्,
समाजराजहंसवंश – निक्वणातिगौरवे।
विलोलहेमवल्लरी विडम्बिचारुचंक्रमे,
कदाकरिष्यसीह मां कृपाकटाक्षभाजनम्॥
अनन्तकोटिविष्णुलोक नम्रपद्मजार्चिते,
हिमाद्रृजापुलोमजाविरंचिजावरप्रदे ।
अपारसिद्धिवृद्धिदिग्ध सत्पदांगुलीनखे,
कदाकरिष्यसीह मां कृपाकटाक्षभाजनम्॥
मखेश्वरी क्रियेश्वरी स्वधेश्वरी सुरेश्वरी,
त्रिवेदभारतीश्वरी प्रमाणशासनेश्वरी ।
रमेश्वरी क्षमेश्वरी प्रमोदकाननेश्वरि
व्रजेश्वरी व्रजाधिपे श्रीराधिके नमोस्तुते॥

इतीदमद्भुतस्तवं निशम्य भानुनन्दिनी
करोतु सन्ततं जनं कृपाकटाक्षभाजनम्।
भवेत्तदैव संचित त्रिरूपकर्मनाशनम्
लभेत्तदा व्रजेन्द्रसूनु–मण्डलप्रवेशनम् ॥

★★★★

श्रीकृष्ण कृपाकटाक्ष

भजे व्रजैक मण्डनं समस्तपापखण्डनं
स्वभक्त चित्त रञ्जनं सदैव नन्दनन्दनम्।
सुपिच्छ गुच्छ मस्तकं सुनाद वेणु हस्तकं
अनंग रंग सागरं नमामि कृष्ण नागरम्॥
मनोजगर्वमोचनं विशाललोललोचनं
विधूतगोपशोचनं नमामि पद्मलोचनम्।
करारविन्दभूधरं स्मितावलोकसुन्दरं
महेन्द्रमानदारणं नमामि कृष्णवारणम्॥
कदम्बसूनुकुण्डलं सुचारुगण्डमण्डलं
व्रजांगनैक वल्लभं नमामि कृष्णदुर्लभम्।
यशोदया समोदया सगोपया सनन्दया
यतं सुखैकदायकं नमामि गोपनायकम्॥

सदैव पाद पंकजं मदीयमानसे निजं
दधानमुक्तमालकं नमामि नन्दबालकम्।
समस्तदोषशोषणं समस्तलोकपोषणं
समस्त गोपमानसं नमामि चित्तचोरकम्॥
भुवो भरावतारकं भवाब्धि कर्णधारकं
यशोमतीकिशोरकं नमामि चित्तचोरकम्।
दृगन्तकान्तभंगिनं सदासदालिसंगिनं
दिने दिने नवं-नवं नमामि नन्दसम्भवम्॥
गुणाकरं सुखाकरं कृपाकरं कृपापरं
सुरद्विषन्निकन्दनं नमामि गोपनन्दनम्।
नवीनगोपनागरं नवीनकेलिलम्पटं
नमामि मेघसुन्दरं तडित्प्रभालसत्पटम्॥
समस्तगोपनन्दनं हृदम्बुजैकमोदनं
नमामि कुञ्जमध्यगं प्रसन्न भानु शोभनम् ।
निकामकामदायकं दृगन्तचारुसायकं
रसालवेणुगायकं नमामि कुञ्जनायकम्॥
विदग्धगोपिकामनोमनोज्ञतल्पशायिनं
नमामि कुञ्जकानने प्रवृद्धवह्निपायिनम।

किशोरकांतिरञ्जितं दृगञ्जनं सुशोभितं
गजेन्द्र मोक्षकारिणं नमामि श्रीविहारिणम् ॥
यदा तदा यथा तथा तथैव कृष्णसत्कथा
मया सदैव गीयतां तथा कृपा विधीयताम् ।
प्रमाणितं स्तवद्वयं पठन्ति प्रातरुत्थिता:
त एव नन्दनन्दनं मिलन्ति भावसंस्थिता: ॥

॥इति ॥

श्रीसुदर्शन चक्रावतार आद्याचार्य भगवान् श्रीनिम्बार्ककृत

प्रात:स्मरण-स्तोत्र

प्रात: स्मरामि युगकेलि- रसाभिषिक्तं
वृन्दावनं सुरमणीयमुदार वृक्षम् ।
सौरीप्रवाहवृतमात्मगुणप्रकाशं
युग्मांघ्रिरेणुकणिकाञ्चितसर्वसत्त्वम् ॥
प्रात:स्मरामि दधिघोषविनित निद्रं
निद्रावसानरमणीयमुखानुरागम् ।
उन्निद्रपद्मनयनं नवनीरदाभं
हृद्यानवद्यललनाञ्चितवामभागम् ॥
प्रातर्भजामि शयनोत्थितयुग्मरूपं

सर्वेश्वरं सुखकरं रसिकेशभूपम्।
अन्योन्यकेलिरसचिह्नसखीदृगौघं
सख्यावृतं सुरतकाममनोहरं च॥
प्रातर्भजेसुरतसारपयोधिचिह्नं
गण्डस्थलेन नयनेन च सन्दधानौ।
रत्याद्यशेषशुभदौ समुपेतकामौ
श्रीराधिकावरपुरन्दरपुण्यपुञ्जौ॥
प्रातर्धरामि हृदयेन हृदीक्षणीयं
युग्मस्वरूपमनिषं सुमनोहरं च।
लावण्यधाम ललना भिरूपेयमान-
मुत्थाप्यमानमनुमेयमशेषवेषैः॥
प्रातर्ब्रवीमि युगलावपि सोमराजौ
राधामुकुन्दपशुपालसुतौ वरिष्ठौ।
गोविन्दचन्द्रवृषभानुसुतौ वरिष्ठौ
सर्वेश्वरौ स्वजनपालनतत्परेशौ॥
प्रातर्नमामि युगलांघ्रिसरोजकोश-
मष्टाङ्गयुक्तवपुषा भवदुःखदारम्।
वृंदावने सुविचरन्तमुदारचिह्नं

लक्ष्म्या उरोजधृतकुंकुमरागपुष्टम्॥

प्रातनर्मामि वृषभानुसुतापदाब्जं

नेत्रालिभिः परिणुतं व्रजसुन्दरीणाम्।

प्रेमातुरेण हरिणा सुविशारदेन,

श्रीमद्व्रजेशतनयेन सदाऽभिवन्द्यम्॥

सञ्चिन्तनीयमनुमृग्यमभीष्टदौहं,

संसारतापशमनं चरणं महार्हम्।

नन्दात्मजस्य सततं मनसागिरा च,

संसेवयामि वपुषा प्रणयेन रम्यम्॥

प्रातः स्तवमिमं पुण्यं प्रातः रुत्थाय यः पठेत्।

सर्वकालं क्रियास्तस्य सफलाः स्युः सदा ध्रुवाः॥

प्रातः कालीन स्तुति

श्रीहंसञ्च सनत्कुमारप्रभृतीन् वीणाधरं नारदम्,

निम्बादित्यगुरुञ्चच द्वादशगुरुन् श्रीश्रीनिवासादिकान्।

वन्दे सुन्दरभट्टदेशिकमुखान् वस्विन्दुसंख्यायुतान्

श्रीव्यासाद्धरिमध्यगाच्च परतान् सर्वान्गुरुन्सादरम्॥

हे निम्बार्क ! दयानिधे गुणनिधे ! हे भक्त चिन्तामणे !,

हे आचार्यशिरोमणे ! मुनिगणैरामृग्यपादाम्बुज ।

हे सृष्टिस्थितिपालक ! प्रभवन ! हे नाथ ! मायाधिप,
हे गोवर्धनकन्दरालय! विभो ! मां पाहि सर्वेश्वर! ॥

ज्ञानस्वरुपञ्च हरेरधिनं, शरीरसंयोगवियोगयोग्यम् ।
अणुं हि जीवं प्रतिदेहभिन्नं ज्ञातृत्ववन्तं यदनन्तमाहुः ॥

अनादि माया परियुक्तरूपं, त्वेनं विदुर्वै भगवत्प्रसादात् ।
मुक्तञ्च बद्धं किलबद्धमुक्तं, प्रभेदबाहुल्यमथापिबोध्यम् ॥

अप्राकृतं प्राकृतरूपकञ्च, कालस्वरूपं तदचेतनं मतम् ।
मायाप्रधानादिपदप्रवाच्यम्, शुक्लादिभेदाश्च समेऽपि तत्र ॥

स्वभावतोऽपास्तसमस्तदोषमशेषकल्याणगुणैकराशिम् ।
व्यूहाङ्गिनं ब्रह्म परंवरेण्यं ध्यायेम कृष्णं कमलेक्षणं हरिम् ॥

अङ्गेतुवामे वृषभानुजां मुदा, विराजमानमनरूपसौभगाम् ।
सखीसहस्त्रैः परिसेवितां सदा, स्मरेमदेवीं सकलेष्टकामदाम् ॥

उपासनीयं नितरां जनैः सदा, प्रहाणयज्ञानतमोनुवृत्तेः ।
सनन्दनाद्यैर्मुनिभिस्तथोक्तं, श्रीनारदायाखिलतत्त्वसाक्षिणे ॥

सर्वं हि विज्ञानमतोयथार्थकं,
श्रुतिस्मृतिभ्यो निखिलस्यवस्तुनः ।
ब्रह्मात्मकत्वादितिवेदविन्मतं,
त्रिरूपताऽपिश्रुतिसूत्रसाधिता ॥

नान्यागतिः कृष्णपदारविन्दात्,
संदृष्यते ब्रह्मशिवादिवन्दितात्।
भक्तेच्छयोपात्तसुचिन्त्यविग्रहा-
दचिन्त्यशक्तेरविचिन्त्यसाशयात्॥
कृपास्य दैन्यादियुजि प्रजायते,
यया भवेत्प्रेम विशेष लक्षणाः।
भक्तिर्ह्यनन्याधिपतेर्महात्मनः
साचोत्तमासाधनरूपिकाऽपरा॥
उपास्यरूपं तदुपासकस्य च,
कृपाफलं भक्तिरसस्ततःपरम्।
विरोधिनोरूपमथैतदाप्ते-
र्ज्ञेया इमेऽर्था अपि पञ्च साधुभिः॥

वृन्दावनकलानाथौ हृदयानन्दवर्धनौ।
सुखदौ राधिकाकृष्णौ भजेहं कुञ्जगामिनौ॥
नमस्तस्मै भगवते कृष्णायाकुण्ठमेधसे।
राधाधरसुधासिन्धु नमो नित्यविहारिणीम्॥
राधां कृष्णस्वरुपां वै कृष्णं राधास्वरुपिणीम्।
कलात्मानं निकुंजस्थं गुरु रूपं सदा भजे॥

तवास्मिन् राधिकाकान्त कर्मणा मनसा गिरा।
कृष्णकान्ते तवैवास्मिन् दास्यां मे देहि सर्वदा॥
त्वमेव माता च पिता त्वमेव, त्वमेव बन्धुश्च सखा त्वमेव।
त्वमेव विद्या द्रविणं त्वमेव, त्वमेव सर्वं मम देव देव॥
भक्तिश्च भक्ताः भगवान् गुरुश्च नामानि चत्वारि शरीरमेकम्।
तत्पादपङ्केरुहवन्दनेन समस्त विघ्नं विनशम्प्रयान्तु॥
अपराधसहस्त्रभाजनं पतितं भीमभवार्णोदरे।
अगतिं शरणागतं हरे कृपया केवलमात्मसात्कुरु॥

श्रीगुरु प्रार्थना

श्रीमद्हंसं समारभ्य सनकादिक मध्यमाम्।
अस्मदाचार्यपर्यन्तं, वन्दे गुरु परम्पराम्॥
आनन्दमानन्दकरं प्रसन्नं, ज्ञानस्वरुपं निजभावयुक्तं।
योगिन्द्रमीड्यं भवरोगवैद्यं, श्रीमद्गुरुं नित्यमहं नमामि॥

सायङ्कालीन श्रीभगवतस्तुति

श्रीहंसञ्च सनत्कुमारप्रभृतीन् वीणाधरं नारदम्,
निम्बादित्यगुरुञ्चच द्वादशगुरुन् श्रीश्रीनिवासादिकान्।
वन्दे सुन्दरभट्टदेशिकमुखान् वस्विन्दुसंख्यायुतान्
श्रीव्यासाद्धरिमध्यगाच्च परतान् सर्वान्गुरुन्सादरम्॥

हे निम्बार्क ! दयानिधे गुणनिधे ! हे भक्त चिन्तामणे!
हे आचार्यशिरोमणे ! मुनिगणैरामृग्यपादाम्बुज ।
हे सृष्टिस्थितिपालक ! प्रभवन ! हे नाथ ! मायाधिप,
हे गोवर्धनकन्दरालय! विभो ! मां पाहि सर्वेश्वर! ॥

कस्तुरी-तिलकं ललाटपटले वक्षस्थले कौस्तुभं,
नासाग्रे वरमौक्तिकं करतले वेणुः करेकङ्कणम्।
सर्वाङ्गे हरिचन्दनं सुललितं कण्ठे च मुक्तावली,
गोपस्त्री परिवेष्टितो विजयते गोपालचूडामणि॥

फूल्लेन्दिवर कान्तिमिन्दुवदनं वर्हावतंसप्रियं,
श्रीवत्साङ्कमुदारकौस्तुभधरं पीताम्बरं सुन्दरम्।
गोपिनां नयनोत्पलार्चित तनुं गोगोपसङ्घावृतम्,
गोविन्दं कलवेणुवादनपरं दिव्याङ्गभूषं भजे॥

हे राधे! वृषभानुभूपतनये! हे पूर्णचन्द्रानने!,
हे कान्ते! कमनीय-कोकिलरवे! वृन्दावनाधीश्वरि।
हे मत्प्राणपरायणे च रसिके! हे सर्वयूथेश्वरि!,
आगत्य त्वरितं प्रतप्तमनिषं मां दीनमानन्दये॥

हे राधे! वृषभानुभूपतनये! सर्वेश्वरि राधिके,
हे कृष्णानन-पङ्कज-भ्रमरिके! कृष्णप्रिये माधवि।

हे वृन्दावननागरि! गुणगुरो! दामोदर प्रेयसि,
हे हे श्रीललितादिक-प्रियसखि! प्राणाधिपे पाहिमाम्॥
सिञ्जन्नुपूरपादपद्मयुगलां हंसीं गतिं विभ्रतीम्,
चञ्चत्खञ्जनमञ्जुलोचनयुगां पीनोल्लसत्कन्धराम्।
शुभ्रत्काञ्चनकङ्कणद्युतिमिलत्पाणौ चलच्चामरम्,
कुर्वाणां हरिराधिकोपरि सदा श्रीरङ्गदेवीं भजे॥
श्रीरङ्गादिसुदेविका च ललिता वैशाखिका चम्पिका,
चित्रा तुङ्गसखीन्दुलेखिकपरा चाष्टौ प्रधानप्रियाः।
अन्याः सन्ति मनोहराः प्रियतमा नित्यं नवीनायिताः,
वन्दे तच्चरणारविन्दमनिशं दासोऽस्म्यहं श्रद्धया॥
स्वभावतोऽपास्त-समस्तदोषमशेषकल्याणगुणैक-राशिम्।
व्यूहाङ्गिनं ब्रह्म परंवरेण्यं ध्यायेम कृष्णं कमलेक्षणं हरिम्॥
अङ्गेतुवामे वृषभानुजां मुदा, विराजमानमनरूपसौभगाम्।
सखीसहस्रैःपरिसेवितांसदा,स्मरेमदेवीं सकलेष्ट कामदाम्॥
नान्यागतिः कृष्णपदारविन्दात्,संदृष्यते ब्रह्मशिवादिवन्दितात्।
भक्तेच्छयोपात्तसुचिन्त्यविग्रहाद-चिन्त्यशक्तेरविचिन्त्यसाशयात्॥
न धर्मनिष्ठोस्मि न चात्मवेदि, न भक्ति मां त्वच्चरणारविन्दे।
अकिञ्चनोनान्यगति शरण्यम्, त्वत्पादमूलं शरणं प्रपद्ये॥

वशीकृतं यान्ति न इन्द्रियाणि बुद्धिर्नशुद्धं समुपैति तस्मात्।
नसाधनमेस्ति तव प्रसादे दयालु भावे नविना हरे ते॥
अहो दयालो स्वदया वशे न वै, प्रपश्य मां प्रापय पादसेवने।
यथा पुनर्मे विषयेषु माधव, रतिर्न भूयाद्धितथैव साधय॥
वृन्दावनकलानाथौ हृदयानन्दवर्धनौ।
सुखदौ राधिकाकृष्णौ भजेहं कुञ्जगामिनौ॥
नमस्तस्मै भगवते कृष्णायाकुण्ठमेधसे।
राधाधरसुधासिन्धु नमो नित्यविहारिणीम्॥
राधां कृष्णस्वरुपां वै कृष्णं राधास्वरुपिणीम्।
कलात्मानं निकुञ्जस्थं गुरु रूपं सदा भजे॥
तवास्मिन् राधिकाकान्त कर्मणा मनसा गिरा।
कृष्णकान्ते तवैवास्मिन् दास्यां मे देहि सर्वदा॥
त्वमेव माता च पिता त्वमेव, त्वमेव बन्धुश्च सखा त्वमेव।
त्वमेव विद्या द्रविणं त्वमेव,त्वमेव सर्वं मम देव देव॥

श्रीगुरु प्रार्थना

श्रीमद्हंसं समारभ्य सनकादिक मध्यमाम्।
अस्मदाचार्यपर्यन्तं, वन्दे गुरु परम्पराम्॥

आनन्दमानन्दकरं प्रसन्नं, ज्ञानस्वरुपं निजभावयुक्तं।
योगिन्द्रमीड्यं भवरोगवैद्यं, श्रीमद्गुरुं नित्यमहं नमामि ।।

रसिक राजराजेश्वर श्री हरिव्यास देवाचार्यकृत

सायङ्कालीन सङ्कीर्तन-स्तुति

श्रीराधापराभक्तिप्रदायिन्यै नमो नमः

।। दोहा ।।

पराभक्ति रति वर्द्धिनी, स्यामा सब सुख दैंनि ।
रसिक मुकुटमनि राधिके, जै नव नीरज नैंनि ।।

।। स्तोत्र ।।

जयति जय राधा रसिकमनिमुकुट मन-हरनी त्रिये।
पराभक्ति प्रदायिनी करि कृपा करुणानिधि प्रिये।
जयति गोरी नव किसोरी सकल सुख सीमा श्रिये।
पराभक्ति प्रदायिनी करिकृपा करुनानिधि प्रिये ।
जयति रति रस वर्द्धिनी अति अद्भुता सदया हिये।
पराभक्ति प्रदायिनी करिकृपा करुनानिधि प्रिये ।
जयति आनंदकंदनी जगवंदनी बरवदनिये।
पराभक्ति प्रदायिनी करिकृपा करुनानिधि प्रिये ।
जयति स्यामा अमितनामा वेदबिधि निर्वाचिये।
पराभक्ति प्रदायिनी करिकृपा करुनानिधि प्रिये ।

जयति रास-विलासनी कलकला कोटि प्रकासिये।
पराभक्ति प्रदायिनी करिकृपा करुनानिधि प्रिये।
जयति विविधि विहार कवनी रसिकरवनी सुभधिये।
पराभक्ति प्रदायिनी करिकृपा करुनानिधि प्रिये।
जयति चंचलचारुलोचनि दिव्यदकूला भरनिये।
पराभक्ति प्रदायिनी करिकृपा करुनानिधि प्रिये।
जयति प्रेमा प्रेम सीमा कोकिला कल वैंनिये।
पराभक्ति प्रदायिनी करिकृपा करुनानिधि प्रिये।
जयति कंचनदिव्यअंगी नवलनीरज नैंनिये।
पराभक्ति प्रदायिनी करिकृपा करुनानिधि प्रिये।
जयति वल्लभ-वल्लभा आनंद-कलभा तरुनिये।
पराभक्ति प्रदायिनी करिकृपा करुनानिधि प्रिये।
जयति नागरि गुन उजागरि प्रान धन मन हरनिये।
पराभक्ति प्रदायिनी करिकृपा करुनानिधि प्रिये।
जयति नौतमनित्यलीला नित्यधाम निवासिये।
पराभक्ति प्रदायिनी करिकृपा करुनानिधि प्रिये।
जयति गुन माधूर्य भूपा सिद्धिरूपा सक्तिये।
पराभक्ति प्रदायिनी करिकृपा करुनानिधि प्रिये।

जयति सुद्धस्वभावसीला स्यामला सुकुवारिये।
पराभक्ति प्रदायिनी करिकृपा करुनानिधि प्रिये।
जयति जसजगप्रचुरपरिकर (श्री)हरिप्रिया जीवनि जिये।
पराभक्ति प्रदायिनी करिकृपा करुनानिधि प्रिये॥

श्रीराधाकृष्णाभ्यां नमः

॥ दोहा ॥

नव–नव रंग त्रिभंगि जै, स्याम सुअंगी स्याम।
जै राधे जै हरिप्रिये, श्रीराधे सुख धाम॥

॥ स्तोत्र ॥

जै राधे जै राधे राधे जै राधे जै श्रीराधे।
जैकृष्ण जैकृष्ण कृष्ण जैकृष्ण जैश्रीकृष्ण॥
स्यामांगोरी नित्यकिसोर प्रीतमजोरी श्रीराधे।
रसिकरसीलो छैलछवीलो गुनगरवीलो श्रीकृष्ण॥
रासविहारनि रसविसतारनि पियउरधारनि श्रीराधे।
नव–नवरंगी नवलत्रिभंगी स्यामसुअंगी श्रीकृष्ण॥
प्रांनपियारी रूपउज्यारी अतिसुकुवारी श्रीराधे।
मैंनमनोहर महामोदकर सुंदरवरतर श्रीकृष्ण॥
सोभासैंनी मोभामैंनी कोकिलबैंनी श्रीराधे।

कीरतिवंता कामिनिकंता श्रीभगवंता श्रीकृष्ण॥
चंदा-वदनी कुन्दारदनी सोभासदनी श्रीराधे।
परमउद्दारा प्रभाअपारा अतिसुंकुवारा श्रीकृष्ण॥
हंसागवनी राजतरवनी क्रीड़ाकवनी श्रीराधे।
रूपरसाला नेंनविसाला परमकृपाला श्रीकृष्ण॥
कंचनवेली रतिरसरेली अतिअलवेली श्रीराधे।
सवसुखसागर सवगुनआगर रूपउजागर श्रीकृष्ण॥
रवनीरम्या तर-तरतम्यां गुणआगम्या श्रीराधे।
धामनिवासी प्रभाप्रकासी सहजसुहासी श्रीकृष्ण॥
शक्त्याह्लादनी अतिप्रियवादनी उरउन्मादनी श्रीराधे।
अंग-अंगटौनां सरससलौंनां सुभगसुठौनां श्रीकृष्ण॥
राधानामिनि गुनअभिरामनि हरिप्रियास्वामिनी श्रीराधे।
हरेहरे हरि हरेहरे हरि हरेहरे हरि श्रीकृष्ण॥

★★★

श्रीयुगलमहामन्त्र

राधेकृष्ण राधेकृष्ण कृष्णकृष्ण राधेराधे।
राधेश्याम राधेश्याम श्यामश्याम राधेराधे॥

★★★

परमपूज्य श्रीगुरुदेव
श्री श्री श्री १०८ स्वामी श्रीमुरारीदास जी महाराज